शास्तिः, स्त्री, (शास+बाहुलकात् तिः । इत्युज्ज्वलदत्तः । ४ । १७९ ।) शासनम् । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १३२।२० ।
"प्राप्तोच्चैरत्वमेतन्मे दुष्टशास्तिसमुद्यतम् ॥")

शास्त्रं, क्ली, (शिष्यते अनेन । शास+"सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४।१५८ । इति ष्ट्रन् ।) निदेशः । ग्रन्थः । इत्यमरः ॥ स च ग्रन्थः अष्टादशविधः । तस्य विवरणं विद्याशब्दे द्रष्टव्यम् ॥ * ॥ शास्त्रोत्पत्तिर्यथा,—

मत्स्य उवाच ।

"तपश्चचार प्रथमममराणां पितामहः ।
आविर्भूतास्ततो वेदाः साङ्गोपाङ्गपदक्रमाः ॥
पुराणं सर्व्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरम् ॥
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ।
मीमांसान्यायविद्याश्च प्रमाणं तर्कसंयुताः ॥
वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः ।
मनसः पूर्व्वसृष्टा वै जाता ये तेन मानसाः ॥"

इति मात्स्ये ३ अध्यायः ॥ * ॥

शास्त्रोक्तकर्म्म कर्त्तव्यं न तु शास्त्रविरुद्धम् । यथा,—

"श्रुतिस्मृतिसदाचारविहितं कर्म्म केवलम् ।
सेवितव्यं चतुर्व्वर्गैर्भजद्भिः केशवं सदा ॥
अन्यथा निरयं यान्ति कुमार्गागमसेवनात् ।
अतो वेदविरुद्धार्थं शास्त्रोक्तं कर्म्म संत्यजेत् ॥
स्वबुद्धिरचितैः शास्त्रैः प्रतार्य्येह च बालिशान् ।
विघ्नन्ति श्रेयसो मार्गं लोकनाशाय केवलम् ॥
निन्दन्ति देवता वेदांस्तपो निन्दन्ति सद्द्विजान् ।
तेन ते निरयं यान्ति ह्यसच्छास्त्रनिषेवणात् ॥
श्रुतिस्मृतिसदाचारविहितं कर्म्म शाश्वतम् ।
स्वं स्वं धर्म्मं प्रयत्नेन श्रेयोऽर्थीह समाचरेत् ॥
स्वबुद्धिरचितैः शास्त्रैर्मोहयित्वा जनं नराः ।
तेन ते निरयं यान्ति युगानां सप्तविंशतिः ॥"

इति पाद्मे उत्तरखण्डे १७ अध्यायः ॥ * ॥

अध्यात्मशास्त्रातिरिक्तशास्त्रनिन्दा यथा,—

"पुराणं भारतं वेदधर्म्मशास्त्राणि यानि च ।
आयुषः क्षपणायैव धर्म्मतश्चेन्न चाचरेत् ॥
पुत्त्रदारादिसंभारः पुंसां संमूढचेतसाम् ।
विदुषां शास्त्रसंभारः तद्योगाभ्यासविघ्नकृत् ॥
इदं ज्ञेयमिदं ज्ञेयं यः सर्व्वं ज्ञातुमिच्छति ।
अपि वर्षशतेनापि शास्त्रान्तं नाधिगच्छति ॥
विज्ञायाक्षरतन्मात्रं जीवितञ्चापि चञ्चलम् ।
विहाय शास्त्रजालानि पारलौकिकमाचरेत् ॥
पण्डितोऽपि हि मूर्खोऽसौ शक्तियुक्तोऽप्यशक्तिकः ।
यः संसारान्न चात्मानं समुत्तारयितुं क्षमः ॥"

इति वह्निपुराणे सुनामद्वादशीनामाध्यायः ॥ * ॥

वेदविरुद्धशास्त्राणि यथा,—

"अन्यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनानि च ।
वेदवादविरुद्धानि मयैव कथितानि तु ॥
वामं पाशुपतं योगं नाकुलं चैव भैरवम् ।
असेव्यमेतत् कथितं वेदबाह्यं तथेतरत् ॥
वेदमूर्त्तिरहं विप्रा नान्यशास्त्रार्थवादिभिः ।
ज्ञायते मत्स्वरूपन्तु मुक्त्वा वेदं सनातनम् ॥"

इति कौर्म्मे उपविभागे ३६ अध्यायः ॥ * ॥

अपि च । कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यम् ।

"यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च ।
श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
करालभैरवञ्चापि यामलं वामनाश्रितम् ।
एवंविधानि चान्यानि मोहनार्थानि तानि तु ।
मया सृष्टानि चान्यानि मोहायैषां भवार्णवे ॥"

तस्मात् सद्भिः श्रुतिस्मृतिविरुद्धे वर्त्मनि न कदाचित् पदं न्यस्तव्यम् । इति मलमासतत्त्वम् ॥ * ॥

पृथिव्यां तन्त्रशास्त्रावतरणं यथा,—

शिव उवाच ।

"लम्बोदर महाभाग शृणु मे परमं वचः ।
इदं महासुसन्दर्भं मम वक्त्राद्विनिर्गतम् ॥
निर्गतं पार्व्वतीवक्त्रात्तन्त्रं परमदुर्लभम् ।
विलिख्य बहुयत्नेन गच्छ सिद्धाश्रमं सुत ॥
यत्र तिष्ठन्ति मुनयो वेदवेदाङ्गपारगाः ।
अणिमादिगुणैर्युक्तः शीघ्रं त्वं भव मे सुत ॥
इत्युक्तः शङ्करेणासौ चाष्टबाहुरभूत्ततः ।
चतुर्भिर्हस्तैः संलिख्य शिवाय विनिवेदयेत् ॥

शिव उवाच ।

गच्छ पुत्त्र महाबाहो तन्त्रमादाय सत्वरम् ।
सिद्धाश्रमं वनं रम्यं यथेन्द्रस्य च नन्दनम् ।
प्रणम्य प्रययौ शीघ्रं तन्त्रमादाय तद्वनम् ॥"

इत्युपक्रम्य ।

"मुनेर्व्वाक्यं ततः श्रुत्वा तत्तन्त्रं मुनये ददौ ।
एवं तन्त्राणि सर्व्वाणि विलिख्य विनिवेदयेत् ॥"

इति गायत्त्रीतन्त्रे दशमशाखापटलः ॥ * ॥

शैवपाशुपतादिशास्त्रोत्पत्तिर्यथा,—

"प्रथमं हि मया प्रोक्तं शैवं पाशुपतादिकम् ।
मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परम् ॥
कणादेन च संप्रोक्तं शास्त्रं वैशेषिकं महत् ।
गौतमेन तथा न्यायं सांख्यन्तु कपिलेन तु ॥
धिषणेन तथा प्रोक्तं चार्व्वाकमतिगर्हितम् ॥
दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ।
बौद्धशास्त्रं तथा प्रोक्तं नग्ननीलपटादिकम् ॥
आपत्यं श्रुतिवाक्यानां दर्शयन् लोकगर्हितम् ।
कर्म्मस्वरूपत्याज्यत्वमत्र वै प्रतिपद्यते ।
सर्व्वकर्म्मपरिभ्रष्टं कल्पञ्चन्तु तदुच्यते ॥
गौतमप्रोक्तशास्त्रार्थनिरताः सर्व्व एव हि ।
शार्गालीं योनिमापन्नाः सन्दिग्धाः सर्व्वकर्म्मसु ॥"

इति गान्धर्व्वतन्त्रे प्रथमपटलः ॥

शास्त्रकृत्, पुं, (शास्त्रं करोतीति । कृ+क्विप् ।) ऋषिः । इति त्रिकाण्डशेषः ॥ शास्त्रकर्त्तरि, त्रि ॥ (यथा, भागवते । १ । १० । २२ ।
"विधित्समानोऽनुससार शास्त्रकृत् ॥")

शास्त्रगण्डः, त्रि, प्रघटावित् । इति त्रिकाण्डशेषः ॥ हारावल्यां छात्रगण्ड इति पाठः ॥

शास्त्रचक्षुः, [स्] क्ली, (शास्त्रेषु चक्षुरिव ।) व्याकरणम् । इति केचित् ॥

शास्त्रचारणः, त्रि, (शास्त्रं चारयति प्रचारयतीति । चर+णिच्+ल्युः ।) शास्त्रदर्शी । इति शब्दरत्नावली ॥

शास्त्रज्ञः, त्रि (शास्त्रं जानातीति । ज्ञा+कः ।) शास्त्रवेत्ता । यथा,—
"अनियुक्तो नियुक्तो वा शास्त्रज्ञो वक्तुमर्हति ।
दैवीं वाचं स वदति यः शास्त्रमुपजीवति ॥"

इति व्यवहारतत्त्वधृतनारदवचनम् ॥

शास्त्रतत्त्वज्ञः, पुं, (शास्त्रस्य तत्त्वं जानातीति । ज्ञा+कः ।) गणकः । यथा, शब्दरत्नावल्याम् ।
"दैवज्ञो गणको ज्ञानी मौहूर्त्तो दैवलेखकः ।
वार्त्तान्तिको ज्यौतिषिको मौहूर्त्तिकप्रसूचकौ ॥
संवत्सरो वर्षकोषो रेखाजीवी गणाङ्कभुक् ।
तान्त्रिको ज्ञातसिद्धान्तः शास्त्रतत्त्वज्ञ ईरितः ॥"

शास्त्रदर्शी, [न्] त्रि, (शास्त्रं द्रष्टुं शीलमस्य । णिनिः ।) शास्त्रज्ञः । तत्पर्य्यायः । अन्तर्व्वाणिः २ शास्त्रवित् ३ शास्त्रचारणः ४ । इति शब्दरत्नावली ॥

शास्त्रवित्, [द्] त्रि, (शास्त्रं वेत्तीति । विद्+सत्सूद्विषेति क्विप् ।) शास्त्रदर्शी । इत्यमरः ॥

शास्त्रविप्रतिषिद्धः, त्रि, (शास्त्रेण विप्रतिषिद्धः ।) शास्त्रनिषिद्धः । शास्त्रशब्दपूर्व्वकविपूर्व्वकसिध-धातोः कर्म्मणि क्तप्रत्ययेन निष्पन्नो वा ॥

शास्त्रशिल्पी, [न्] पुं, (शास्त्रं शिल्पमस्यास्तीति । इनिः ।) काश्मीरदेशः । तद्देशस्थे, पुं भूम्नि । इति त्रिकाण्डशेषः ॥

शास्त्री, [न्] त्रि, शास्त्रज्ञः । शास्त्रं वेत्तीत्यर्थे णिनुप्रत्ययेन निष्पन्नः ॥

शास्यः, त्रि, (शास्+ण्यत् ।) शासनीयः । शासितव्यः । (यथा, मनौ । ८ । १९१ ।
"यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् ॥"
शिक्षणीयः । यथा, ऋग्वेदे । १ । १८९ । ७ ।
"अभिपित्वे मनवे शास्यो भूः ।"
"शास्यो भूः शिक्षणीयो भव इदं कुरु इदं कुरु इति विधेयो भव ।" इति तद्भाष्ये सायणः ।)

शि, न ञ निशाने । इति कविकल्पद्रुमः ॥ (स्वा०-उभ०-सक०-अनिट् ।) निशानमिति शते रूपम् । शान ञ तेजे इत्यस्य नित्यसनन्तत्वात् । अनेकार्थत्वात् निशानमिह तीक्ष्णीकरणम् । न ञ, शिनोति शिनुते खड्गं कर्म्मकारः । इति दुर्गादासः ॥

शिंशपा, स्त्री, वृक्षविशेषः । शिशु इति भाषा । तत्पर्य्यायः । पिच्छिला २ अगुरुः ३ कपिला ४ भस्मगर्भा ५ । इत्यमरः ॥ अगुरुशिंशपा ६ । इति भरतः ॥ कृष्णसारा ७ । इति जटाधरः ॥ पिङ्गला ८ पिच्छला ९ वीरा १० । इति रत्नमाला ॥ * ॥ यथा,—
"शिंशपा गुरुसारा च पिच्छिला गुरुशिंशपा ।
सा चेत् कपिलवर्णा स्याद्भस्मगर्भा निगद्यते ॥